# Vimshati Shloki Nrisimha DhyAnam

# विंशतिश्लोकी नृसिंहध्यानम्

## Document Information

Text title : Vimshati Shloki Nrisimha DhyAnam

File name : viMshatishlokInRRisiMhadhyAnam.itx

Category : vishhnu, dashAvatAra, viShNu, dhyAnam, viMshati

Location : doc_vishhnu

Proofread by : Manoj Kumar Barman

Description/comments : nRRisiMhakosha 3 upAsanA khaNDa uttarArdha

Latest update : August 11, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 11, 2025

*sanskritdocuments.org*

Vimshati Shloki Nrisimha DhyAnam

# विंशतिश्लोकी नृसिंहध्यानम्

अथ विंशति श्लोकी ध्यानम् ॥

महाचक्रस्य नाभ्यां तु चिन्तयेत् क्षीरसागरम् ।
क्षीरसागरमध्यस्थं श्वेतद्वीपं विचिन्तयेत् ॥ १ ॥

तन्मध्ये तु महादिव्यं प्रासादं रत्ननिर्मितम् ।
प्रासादमध्ये चन्द्राभं सिंहासनमनुत्तमम् ॥ २ ॥

तस्योपरि महाभागं शेषाख्यं फणिमण्डिलम् ।
तदासनगतं देवं तत्फणैर्व्याप्तमस्तकम् ॥ ३ ॥

पूर्णेन्दु कोटिप्रतिभं नीलकण्ठं त्रिलोचनम् ।
बालेन्दुमण्डितसटं कुण्डलाभ्यां विराजितम् ॥४॥

अनेकरत्नखचितं मुकुटेन च शोभितम् ।
काञ्च्याङ्गुलीयवलयं नुपुराङ्गदभूषणैः ॥५॥

वरदाभयहस्तं च चक्रहस्तं पिनाकिनम् ।
सर्वाङ्गसुन्दरं देवं सर्वाभरणभूषितम् ॥ ६ ॥

स्रष्टारं सर्वजगतां त्रातारं सर्वकामदम् ।
तारैकाक्षरमध्यस्थं नृसिंहं दिव्यरूपिणं ॥ ७ ॥

योगपट्टासनस्थं च महामायेश्वरं विभुम् ।
वामभागेश्रितां देवीं नीलकुञ्चितमूर्द्धजाः ॥ ८ ॥

हेमारविन्दप्रतिभां मौक्तिकाभरणोज्वलाम् ।
दाडिमं सव्यहस्तेन दक्षेनालिङ्ग्य सप्ततिम् ॥ ९ ॥

देवस्याभिमुखीं ध्यायेद्भक्ताभीष्टफलप्रदाम् ।
लक्ष्म्याद्याः शक्तयो देवं वीजयन्त्यः समन्ततः ॥ १० ॥

लावण्यामृततोयेन सिंञ्चित्योऽपि च सर्वशः ॥

शक्तिभिर्मंदरत्नाभिः सर्वतः परिवारितम् ॥ ११॥

सिद्धगन्धर्वनागैश्च विद्याधरवधूगणैः ॥
चामरैर्वीराज्यमानं च लक्ष्म्याद्याभिश्च शक्तिभिः ॥ १२॥

गायन्तीभिस्तुवन्तीभिर्निषेवितम् ।
सनकाद्यैर्योगिवरैर्ब्रह्मेशाद्यैः सुरोत्तमैः ॥ १३।
दक्षेतिग्मद्युतिं चैव हिमांशुं वामतः स्थितम् ।
वेदैः साङ्गैर्मन्त्रवरैस्तूयमानं मुदान्वितम् ॥ १४॥

गीयमानं सुदेवेशं सामगैर्ब्रह्मवादिभिः ।
आयुधप्रवरैश्चैव मूर्तिमद्भिरुपासितम् ॥ १५॥

षभिः सुदर्शनैरन्तर्मायया समलङ्कृतम् ।
अष्टद्वादशपत्रस्थैः सेवितं परम मुदा ॥ १६॥

नारायणैर्वासुदेवैर्वेष्टितं ब्राह्ममायया ।
मातृकाभिः षोडशभिस्तयान्तर्मायेयावृतम् ॥ १७॥

द्वात्रिंशद्भिः नृसिंहैश्च वेष्टितं बाह्ममायया ।
वसुभीर्रुद्रैरादित्यैर्विश्वेदेवैर्यथाक्रमं ॥ १८॥

सर्वापत्तारकं चक्रं कालानलसमप्रभम् ।
एवं नृसिहं चक्रस्थं सकृत्ध्यायालि यो नरः ॥ १९॥

आचष्टे तारकं ब्रह्म कृपालुः परमेश्वरः ।
सर्वापभ्दयो विमुच्यते मृत्युं जयति दुस्तरम् ॥ २०॥

ऐहिकामुष्मिकान्भोगान्प्राप्नोत्यव्यहतान्नरः ॥
य इदं परमं गुह्यं नृसिंहं ध्यानमुत्तमम् ॥
पठत्यनुदिनं भक्त्या नृसिंहत्वमवाप्नुयात् ॥ २१॥

इति शेषभगवत्कृतं विंशती श्लोकी ध्यानं समाप्तम् ॥

Proofread by Manoj Kumar Barman

*Vimshati Shloki Nrisimha DhyAnam*

pdf was typeset on August 11, 2025

Please send corrections to *sanskrit@cheerful.com*